॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय २३

सा सीता तच्छिरो दृष्ट्वा तच्च कार्मुकमुत्तमम् ।
सुग्रीवप्रतिसंसर्गमाख्यातं च हनूमता ॥ १॥

नयने मुखवर्णं च भर्तुस्तत्सदृशं मुखम् ।
केशान्केशान्तदेशं च तं च चूडामणिं शुभम् ॥ २॥

एतैः सर्वैरभिज्ञानैरभिज्ञाय सुदुःखिता ।
विजगर्हेऽथ कैकेयीं क्रोशन्ती कुररी यथा ॥ ३॥

सकामा भव कैकेयि हतोऽयं कुलनन्दनः ।
कुलमुत्सादितं सर्वं त्वया कलहशीलया ॥ ४॥

आर्येण किं नु कैकेय्याः कृतं रामेण विप्रियम् ।
यद्गृहाच्चीरवसनस्तया प्रस्थापितो वनम् ॥ ५॥

एवमुक्त्वा तु वैदेही वेपमाना तपस्विनी ।
जगाम जगतीं बाला छिन्ना तु कदली यथा ॥ ६॥

सा मुहूर्तात्समाश्वस्य प्रतिलभ्य च चेतनाम् ।
तच्छिरः समुपाघ्राय विललापायतेक्षणा ॥ ७॥

हा हतास्मि महाबाहो वीरव्रतमनुव्रता ।
इमां ते पश्चिमावस्थां गतास्मि विधवा कृता ॥ ८॥

प्रथमं मरणं नार्या भर्तुर्वैगुण्यमुच्यते ।
सुवृत्तः साधुवृत्तायाः संवृत्तस्त्वं ममाग्रतः ॥ ९॥

दुःखादुःखं प्रपन्नाया मग्नायाः शोकसागरे ।
यो हि मामुद्यतस्त्रातुं सोऽपि त्वं विनिपातितः ॥ १०॥

सा श्वश्रूर्मम कौसल्या त्वया पुत्रेण राघव ।
वत्सेनेव यथा धेनुर्विवत्सा वत्सला कृता ॥ ११॥

आदिष्टं दीर्घमायुस्ते यैरचिन्त्यपराक्रम ।
अनृतं वचनं तेषामल्पायुरसि राघव ॥ १२॥

अथ वा नश्यति प्रज्ञा प्राज्ञस्यापि सतस्तव ।
पचत्येनं तथा कालो भूतानां प्रभवो ह्ययम् ॥ १३॥

अदृष्टं मृत्युमापन्नः कस्मात्त्वं नयशास्त्रवित् ।
व्यसनानामुपायज्ञः कुशलो ह्यसि वर्जने ॥ १४॥

तथा त्वं सम्परिष्वज्य रौद्र्यातिनृशंसया ।
कालरात्र्या मयाच्छिद्य हृतः कमललोचनः ॥ १५॥

उपशेषे महाबाहो मां विहाय तपस्विनीम् ।
प्रियामिव शुभां नारीं पृथिवीं पुरुषर्षभ ॥ १६॥

अर्चितं सततं यत्नाद्गन्धमाल्यैर्मया तव ।
इदं ते मत्प्रियं वीर धनुः काञ्चनभूषितम् ॥ १७॥

पित्रा दशरथेन त्वं श्वशुरेण ममानघ ।
पूर्वैश्च पितृभिः सार्धं नूनं स्वर्गे समागतः ॥ १८॥

दिवि नक्षत्रभूतस्त्वं महत्कर्म कृतं प्रियम् ।
पुण्यं राजर्षिवंशं त्वमात्मनः समुपेक्षसे ॥ १९॥

किं मान्न प्रेक्षसे राजन्किं मां न प्रतिभाषसे ।
बालां बालेन सम्प्राप्तां भार्यां मां सहचारिणीम् ॥ २०॥

संश्रुतं गृह्णता पाणिं चरिष्यामीति यत्त्वया ।
स्मर तन्मम काकुत्स्थ नय मामपि दुःखिताम् ॥ २१॥

कस्मान्मामपहाय त्वं गतो गतिमतां वर ।
अस्माल्लोकादमुं लोकं त्यक्त्वा मामिह दुःखिताम् ॥ २२॥

कल्याणैरुचितं यत्तत्परिष्वक्तं मयैव तु ।
क्रव्यादैस्तच्छरीरं ते नूनं विपरिकृष्यते ॥ २३॥

अग्निष्टोमादिभिर्यज्ञैरिष्टवानाप्तदक्षिणैः ।
अग्निहोत्रेण संस्कारं केन त्वं तु न लप्स्यसे ॥ २४॥

प्रव्रज्यामुपपन्नानां त्रयाणामेकमागतम् ।
परिप्रक्ष्यति कौसल्या लक्ष्मणं शोकलालसा ॥ २५॥

स तस्याः परिपृच्छन्त्या वधं मित्रबलस्य ते ।

तव चाख्यास्यते नूनं निशायां राक्षसैर्वधम् ॥ २६ ॥

सा त्वां सुप्तं हतं श्रुत्वा मां च रक्षोगृहं गताम् ।
हृदयेन विदीर्णेन न भविष्यति राघव ॥ २७ ॥

साधु पातय मां क्षिप्रं रामस्योपरि रावणः ।
समानय पतिं पत्न्या कुरु कल्याणमुत्तमम् ॥ २८ ॥

शिरसा मे शिरश्चास्य कायं कायेन योजय ।
रावणानुगमिष्यामि गतिं भर्तुर्महात्मनः ।
मुहूर्तमपि नेच्छामि जीवितुं पापजीविना ॥ २९ ॥

श्रुतं मया वेदविदां ब्राह्मणानां पितुर्गृहे ।
यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः ॥ ३० ॥

क्षमा यस्मिन्दमस्त्यागः सत्यं धर्मः कृतज्ञता ।
अहिंसा चैव भूतानां तमृते का गतिर्मम ॥ ३१ ॥

इति सा दुःखसन्तप्ता विललापायतेक्षणा ।
भर्तुः शिरो धनुस्तत्र समीक्ष्य जनकात्मजा ॥ ३२ ॥

एवं लालप्यमानायां सीतायां तत्र राक्षसः ।
अभिचक्राम भर्तारमनीकस्थः कृताञ्जलिः ॥ ३३ ॥

विजयस्वार्यपुत्रेति सोऽभिवाद्य प्रसाद्य च ।
न्यवेदयदनुप्राप्तं प्रहस्तं वाहिनीपतिम् ॥ ३४ ॥

अमात्यैः सहितः सर्वैः प्रहस्तः समुपस्थितः ।
किं चिदात्ययिकं कार्यं तेषां त्वं दर्शनं कुरु ॥ ३५ ॥

एतच्छ्रुत्वा दशग्रीवो राक्षसप्रतिवेदितम् ।
अशोकवनिकां त्यक्त्वा मन्त्रिणां दर्शनं ययौ ॥ ३६ ॥

स तु सर्वं समर्थ्यैव मन्त्रिभिः कृत्यमात्मनः ।
सभां प्रविश्य विदधे विदित्वा रामविक्रमम् ॥ ३७ ॥

अन्तर्धानं तु तच्छीर्षं तच्च कार्मुकमुत्तमम् ।
जगाम रावणस्यैव निर्याणसमनन्तरम् ॥ ३८ ॥

राक्षसेन्द्रस्तु तैः सार्धं मन्त्रिभिर्भीमविक्रमैः ।
समर्थयामास तदा रामकार्यविनिश्चयम् ॥ ३९ ॥

अविदूरस्थितान्सर्वान्बलाध्यक्षान्हितैषिणः ।
अब्रवीत्कालसदृशो रावणो राक्षसाधिपः ॥ ४० ॥

शीघ्रं भेरीनिनादेन स्फुटकोणाहतेन मे ।
समानयध्वं सैन्यानि वक्तव्यं च न कारणम् ॥ ४१ ॥

ततस्तथेति प्रतिगृह्य तद्वचो
बलाधिपास्ते महदात्मनो बलम् ।
समानयंश्चैव समागतं च ते
न्यवेदयन्भर्तरि युद्धकाङ्क्षिणि ॥ ४२ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com